भगिनीगमनं १
आचार्य्यभार्य्यागमनं १
शरणागतागमनं १
राज्ञीगमनं १
प्रव्रजितागमनं १
धात्रीगमनं १
साध्वीगमनं १
वर्णोत्तमागमनं १
एतानि त्रयोदश गुर्व्वङ्गनागमनसमानि ॥ १३

इति प्रायश्चित्तविवेकसङ्ग्रहः ॥ ३५

अनुपानं, क्ली, (अनु + पा + कर्म्मणि ल्युट् ।) औषधाङ्गपेयविशेषः । औषधेन सह तत्पश्चाद्वा पीयते यत् । यथा,—

"अनुपानविशेषेण करोति विविधान् गुणान्" । इति वैद्यकं ॥

अनुपुष्पः, पुं, (पुष्पमनुगतः तत्पुष्पविकासेनैव तत्प्रकाशात् प्रादिसमासः ।) शरः । इति शब्दचन्द्रिका ॥

अनुप्रासः, पुं, (रसाद्यनुगतत्वेन प्रकर्षेण वर्णानामासः न्यासः, अनु + प्र + अस् + घञ् ।) तुल्यवर्णविन्यासः । यथा,—"वर्णसाम्यमनुप्रासः" इति काव्यप्रकाशः ।

"वर्णावृत्तिरनुप्रासः पदे पादे विधीयते" । इति काव्यचन्द्रिका । अस्य विवरणं अलङ्कारशब्दे द्रष्टव्यम् ॥ ("वर्णसाम्यरूपः शब्दालङ्कारविशेषः, अत्र वर्णानामेव सादृश्यं ज्ञेयं, स्वरमात्रेऽपि सादृश्यं वैचित्र्याभावात् न गणितं । स तु पञ्चविधः, छेकानुप्रासो वृत्त्यनुप्रासः श्रुत्यनुप्रासोऽन्त्यानुप्रासो लाटानुप्रासश्चेति । अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यः" । इति साहित्यदर्पणे ।)

अनुप्लवः, पुं, (अनु साहित्येन प्लवते गच्छति, अनु + प्लु + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥ ("सानुप्लवः प्रभुरपि क्षणदाचराणाम्" । इति रघुवंशे ।)

अनुबन्धः, पुं, (अनु + बन्ध + यथासम्भवं भावादौ घञ् ।) दोषोत्पत्तिः । प्रकृत्यादिः । आदिशब्देन प्रत्ययागमादेशाः । विनश्वरः । उच्चरितप्रध्वंसी इत्संज्ञको वर्णः ॥ मुख्यानुयायिशिशुः । विवाहामन्त्रणयात्रादिषु मुख्यं पित्रादिकमनुयाति यः । मुख्यानुयायी शिशुश्चेति द्वयं स्वतन्त्रमिति स्वामी । प्रकृतस्यानुवर्त्तनं । प्रक्रान्तस्य अविवर्त्तनं । इत्यमरभरतौ ॥ दोषोत्पादे यथा,—

"अनुबन्धं बुद्ध्वास्य दण्डो विधीयतामिति" । विनश्वरे यथा । भौट् टकारानुबन्धे लोपः ॥ प्रकृतस्यानुवर्त्तने यथा । भोक्तुमनुबन्धः कृतः । शिशौ यथा । "बालकानुबन्धेन यात्राभङ्गो माभूत्" । इत्यमरटीकासारसुन्दरी ॥ * ॥ बन्धः । इति मेदिनी ॥ आरम्भः । इति शब्दरत्नावली ॥ लेशः । इति त्रिकाण्डशेषः ॥ * ॥ वेदान्तमते अधिकारिविषयसम्बन्धप्रयोजनानि । वैद्यकमते वातादिदोषाणामप्राधान्यं ॥

अनुबन्धी, स्त्री, (अनुबध्यते अतिनिश्वासेन व्याप्यतेऽनया, अनु + बन्ध + करणे घञ्, ततो गौरादित्वात् ङीष् ।) हिक्का । तृष्णा । इति मेदिनी ॥ ("अनुबन्धः शिशौ दोषे पादे मुख्यानुयायिनि ।
विनश्वरे प्रकृत्यादौ प्रकृतस्यानुवर्त्तने ॥
अनुबन्धी तु हिक्कायां तृष्णायामपि योषिति" । इति मेदिनी ।)

अनुबोधः, पुं, (अनु + बुध् + णिच् + भावे अच् ।) गन्धोद्दीपनं न्यूनपूर्व्वगन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्व्वसौगन्ध्योत्पादनं । तत्पर्य्यायः । प्रबोधनं २ । इत्यमरः ॥ पश्चाद्बोधः ॥

अनुभवः, पुं, (अनु + भू + भावे अप् ।) स्मृतिभिन्नज्ञानं । अनुमानादि । धारावाहिज्ञानं । तत्पर्य्यायः । उपलम्भः २ इत्यमरः ॥

अनुभावः, पुं, (अनुभावयति बोधयत्यनेन, अनु + भू + णिच् करणे अच् ।) प्रभावः । कोषदण्डजं तेजः । सतां मतिनिश्चयः । सतां अभिप्रायस्य निश्चयः । निश्चयमात्रेऽपि । भावबोधकः । रत्यादिसूचकगुणक्रियादिः । स च लोचनचातुर्य्यभ्रूक्षेपमुखरागादिरूपः । एवमन्यत्रापि । इत्यमरभरतौ ॥ (स्थिरता । निर्द्धारः । अवश्यम्भाविता । तेजः, यथा,—

"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः" ।
इति रघुवंशे ।)

अनुभूतिः, स्त्री, (अनुभवनं अनु + भू + क्तिन् ।) अनुभवः । सा चतुर्व्विधा । प्रत्यक्षं १ अनुमितिः २ उपमितिः ३ शाब्दबोधः ४ । इति भाषापरिच्छेदः ॥

अनुभूताद्यविस्मृतिः, स्त्री, (अनुभूतादीनि ज्ञानकरणादीनां पदपदार्थप्रभृतीनि न विस्मर्य्यन्तेऽनया, न + वि + स्मृ + करणे क्तिन् ।) संस्कारः । अनुभूतानां स्मृतानाञ्च अविस्मृतिर्यस्मात् स भावनाख्यसंस्कार इति यावत् ॥

अनुमतकर्म्मकारी, [न्] त्रि, (अनुमतमनुज्ञातं कर्म्म कर्म्मधारयः, तत्करोति यः अनुमतकर्म्म + कृ + णिनि उपपदसमासः ।) लिखितपत्राद्यनुसारेण कर्म्मकर्त्ता । आज्ञया कार्य्यकर्त्ता च ॥ इति व्यवहारकाण्डं ॥ अमी इति आरवी भाषा ।

अनुमतिः, स्त्री, (अनु + मन् + भावे क्तिन् । कलाहीनत्वेऽपि पूर्णिमाविच्छितयागादिकरणाय अनुज्ञायतेऽस्यां अनु + मन् + अधिकरणे क्तिन् ।) सम्मतिः । अनुज्ञा । न्यूनेन्दुकला पूर्णिमा । चतुर्द्दशीयुक्ता पूर्णिमा । इति मेदिनी ॥ ("कुह्वै चैवानुमत्यै च प्रजापतय एव च ।
सहद्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" ॥
इति मनुः ।)

अनुमरणं, क्ली, (अनु + मृ + भावे ल्युट् ।) पश्चान्मरणं । भर्त्तरि मृते तत्पादुकादिकमादाय ज्वलच्चितारोहणपूर्व्वकं स्त्रिया मरणं । यथा—

"देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयं ।
निधायोरसि संशुद्धा प्रविशेत् जातवेदसं" ॥

इति ब्रह्मपुराणं ॥ ब्राह्मण्या निषेधमाह, स्मृतिः ।
"पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति" ॥

सहमरणं । मृतभर्त्त्रा सह ज्वलच्चितारोहणपूर्व्वकं स्त्रिया मरणं । यथा,—

"भर्त्त्रानुमरणं काले याः कुर्व्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्व्वाः पूता भवन्ति ताः" ॥
इति महाभारतं ॥

अनुमा, स्त्री, (अनु + मा + भावे अङ् ।) अनुमितिः । अनुमानं । इति त्रिकाण्डशेषः ॥

अनुमानं, क्ली, (अनु + मा + ल्युट् ।) अनुमितिकरणं । अनुमितिः । इति चिन्तामणिः ॥ तत्पर्य्यायः । अनुमा २ इति त्रिकाण्डशेषः ॥

अनुमानोक्तिः, स्त्री, (अनुमानेन उक्तिः कथनं तत्पुरुषः ।) तर्कः । ऊहः । इति हलायुधः ॥

अनुमितिः, स्त्री, (अनु + मा + क्तिन् ।) अनुभवविशेषः । व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यज्ञानं । यथा,—"धूमदर्शनाद्वह्निमान् पर्व्वत इत्याकारज्ञानं । अस्या व्यापारकारणं परामर्शः । अस्याः कारणं व्याप्तिज्ञानं" । इति भाषापरिच्छेदः ॥

अनुमोदितं, त्रि, (अनु + मुद् + णिच् + कर्म्मणि क्तः ।) कृतानुमोदनं । अनुमतं । यथा,—

"भवता यद्व्यवसितं तन्मे साध्वनुमोदितं" ।
इति श्रीभागवतं ॥

("गान्धर्व्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः" ॥
इति शाकुन्तले ।)

अनुयायी, [न्] त्रि, (अनुयाति पश्चात् गच्छति, अनु + या + णिनि ।) सदृशः । पश्चाद्गामी । यथा । मुख्यानुयायिनि शिशावित्यनुबन्धशब्दार्थे अमरः ॥

अनुयुक्तः, पुं, (अनु + युज् + क्तः ।) भृतकाध्येता । इति महाभारतं । (अभियुक्तः । निन्दितः । जिज्ञासितपदार्थः । कृतप्रश्नः ।)

अनुयोक्ता, [ऋ] पुं, (अनु + युज् + तृच् ।) भृतकाध्यापकः । इति महाभारतं ॥ (प्रश्नकर्त्ता ।)

अनुयोगः, पुं, (अनु + युज् + घञ् ।) प्रश्नः । इत्यमरः ॥

अनुयोगकृत्, पुं, (अनुयोगं प्रश्नविषयसन्देहं कृन्तति छिनत्ति, अनुयोग + कृत् + क्विप् ।) आचार्य्यः । इति हेमचन्द्रः ॥

अनुयोजनं, क्ली, (अनु + युज् + णिच् + ल्युट् ।) प्रश्नः । इति हेमचन्द्रः ॥

अनुयोज्यं, त्रि, (अनुयुज्यते नियुज्यते, अनु + युज् + शक्यार्थे ण्यत् ।) निन्दार्हं । अनुपूर्व्वकनिन्दार्थयुजधातोः कर्म्मणि यप्रत्ययः ॥ (प्रष्टव्यः । जिज्ञास्यः ।

"ममेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधि"
इति मनुः ।)

अनुरक्तः, त्रि, (अनु + रन्ज + कर्त्तरि क्तः ।) आसक्तः । अनुरागयुक्तः । यथा,—

"अनुरक्तो गुणान् ब्रूते विरक्तो दूषणानि च" ।
इत्युद्भटः ॥